**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा नवम्बर/दिसम्बर् - २०१६**

कक्षा- आचार्यः - १ (Sem – 1) **प्रश्नपत्रम् - ३** गुणाः - ७०

विषयः - वेदः **कोड - CC - 4.1.2** समयः- ३:०० तः ६:००

दिनाङ्कः – ०७-१२-२०१६ सन्दर्भग्रन्थः - निरुक्तम्

---

प्रथमान्वितिः (युनिट - १)

प्रश्नः १ **कस्यचिदेकस्य व्याख्या विधीयताम् ।** (४)

(अ) तासां महाभाग्यादेकैकस्यापि बहूनि नामधेयानि भवन्ति ।

(आ) तिस्र एव देवता - इति नैरुक्ताः ।

प्रश्नः २ **द्वयोः किमपि एकम् उत्तरयत ।** (१२)

(क) देवताकारचिन्तनविषये यानि यानि मतानि तानि सम्यगुपन्यस्य सिद्धान्तं समर्थयत ।

(ख) येषु मन्त्रेषु देवता नादिष्टा तेषु देवताज्ञानं केन प्रकारेण कर्तव्यमिति विवेचयत।

प्रश्नः ३ **अधो निर्दिष्टेषु चतुर्णामर्थं लिखत ।** (४)

(क) परिदेवना
(ख) आत्मजन्मानः
(ग) नराशंसा
(घ) मन्त्र:
(ङ) स्तोमः
(च) केवलादी

द्वितीयान्वितिः (युनिट - २)

प्रश्नः ४ **एकस्य उत्तरं लिखत ।** (१२)

(अ) निरुक्तशास्त्रानुसार इन्द्रस्य भक्तिसाहचर्यं निरूपयत।

(आ) 'अथैतान्यग्निभक्तीनि' – इति विशदीक्रियताम् ।

प्रश्नः ५ **द्वयोः एकस्य व्याख्या यास्कदिशा विधीयताम् ।** (४)

(क) 'अग्निः सर्वाः देवताः'- इति प्रतिपाद्यताम् ।

(ख) हेमन्तः,पङ्क्तिः,त्रिणवः स्तोमः, शाक्करं साम- इति ।

प्रश्नः ६ **अधोलिखितेषु द्वावेव शब्दौ निर्वक्तव्यौ ।** (४)

(क) अभिक्रन्दन्ति
(ख) अग्निः
(ग) अध्वर्युः
(घ) देवः

## तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७  द्वयोः किमपि एकम् उत्तरयत।** (८)

(अ) जातवेदाः कस्मात् ? यास्कीयनिरुक्तदिशा निर्वचनानि प्रदर्श्य आलोचयत।

(आ) "वैश्वानर" - इति विषये निरुक्तानुसार एकं निबन्धं लिखत।

**प्रश्नः ८  कस्यापि एकस्य व्याख्या विधेया।** (४)

(क) प्र नूनं जातवेदसमश्वं हिनोति वाजिनम्। इदं नो बर्हिरासदे॥

(ख) वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण॥

**प्रश्नः ९  अधो निर्दिष्टेषु त्रयाणामर्थं लिखत।** (३)

(क) अभिसर्पन्ति    (घ) वृत्रहणम्

(ख) दुर्गाणि    (ङ) उत्तरे ज्योतिषी

(ग) वैश्वानरः

## चतुर्थान्वितिः (युनिट – ४)

**प्रश्नः १०  द्वयोः एकः प्रश्नः समाधेयः।** (८)

(क) निरुक्तस्य सप्तमाध्याये के विषया: प्रोक्ता: ? स्पष्टयत।

(ख) 'अयमेव अग्निः वैश्वानरः' – इति साकपूणेः मतं पर्य्यालोचयत।

**प्रश्नः ११  द्वयोः एकः व्याख्येयः।** (४)

(क) कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति।
त आ ववृत्रन्त्सदनादृतस्यादिद्धृतेन पृथिवी व्युद्यते॥

(ख) स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम्।
तम् अकृण्वं स्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः॥

**प्रश्नः १२  केचन त्रयः शब्दाः निरुक्तप्रक्रियानुसारं विश्लेषणीयाः।** (३)

(क) सधमादम्    (घ) जुष्टम्

(ख) सुपर्ण्यः    (ङ) दिवि

(ग) जमदग्निः

***********